सर्व्वं तेन भवेद्दत्तं शास्त्राणां पोषणे कृते ॥
वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं समवाप्नोति विद्यादानान्न संशयः ॥
तस्माद्देवालये नित्यं धर्म्मशास्त्रस्य वा श्रुतेः ।
पठनं कारयेद्राजन् यदीच्छेद्धर्म्ममात्मनः ॥
गोभूहिरण्यवासांसि शयनान्यासनानि च ।
प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम ! ॥
धर्म्माधर्म्मौ न जानाति लोकोऽयं विद्यया विना ।
तस्मात् सदैव धर्म्मात्मन् विद्यादानरतो भव ॥"
इति वह्निपुराणे विद्यादाननामाध्यायः ॥

विद्यादेवी, स्त्री, (विद्याया देवी ।) जिनषोड़शदेव्यन्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥ सरस्वती च ॥

विद्याधनं, क्ली, विद्यया अर्ज्जितधनम् । यथा । विद्याधनमाह कात्यायनः ।
"उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत् ॥
शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात् ।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् ॥
विद्याधनन्तु तत् प्राहुर्विभागे न प्रयोजयेत् ।
शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत् ॥
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यात् न विभाज्यं बृहस्पतिः ॥"
यदि भवान् भद्रमुपन्यस्यति तदा भवत एव मयैतद्देयमिति पणितं यत्रोपन्यासं निस्तीर्य्य लभते तन्न विभाज्यम् । शिष्यादध्यापितात् आर्त्विज्यतः यजमानादृत्त्विज्यया लब्धं धनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य । तथा यत्किञ्चिद्विद्याप्रश्ने निस्तीर्णेऽपणितं यदि कश्चित् परितोषाद्ददाति । तथा यो ह्यस्मिन् शास्त्रार्थे अस्माकं संशयमपनयति तस्मै धनमिदं ददामीत्युपस्थितस्य संशयमपनीय यल्लब्धम् । तथा वादिनोर्व्वादसन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणे यल्लब्धं वस्त्रांशादिकम् । तथा शास्त्रादिप्रकृष्टज्ञानं सम्भाव्य यत् प्रतिग्रहादिना लब्धम् । तथा शास्त्रज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योऽन्यज्ञानविवादे निर्ज्जित्य यल्लब्धम् । तथैकस्मिन् देये बहूनामुपप्लवे येन प्रकृष्टात् यल्लब्धम् । तथा शिल्पादिविद्यया चित्रकरसुवर्णकारादिभिर्यल्लब्धम् । तथा द्यूतेनापि परं निर्ज्जित्य यल्लब्धं तत् सर्व्वमविभाज्यमितरैः । तस्माद्यया कयाचित् विद्यया लब्धमर्ज्जकस्यैव तन्न इतरेषामिति । प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः ॥

नारदः ।
"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन् ॥"
बिभृयादित्येकवचननिर्द्देशान्न बहवः । यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः । अश्रुतो मूर्खः । कल्पतरुमिताक्षरादीपकलिकासु कात्यायनः ।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या ।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते ॥"
अन्यतः पितृमातृकुलव्यतिरिक्तात् । अत्र विशेषयति स एव ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन तद्धनम् ॥"
तत्रोच्चरितविद्यापदसुभाभ्यां सम्बध्यते । तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्याविद्ययोः । वैद्येन विदुषा । पुनर्विशेषयति ।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः ॥"
कुले स्वकुले पितामहपितृव्यादिभ्यः पितृत एव वाऽशिक्षितविद्यानां भ्रातॄणां यद्विद्याशौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ । इति दायतत्त्वम् ॥

विद्याधरः, पुं, देवयोनिविशेषः । इत्यमरः ॥ विद्यां मन्त्रादिकं धरति पचादित्वादः । पुष्पदन्तादिः कामरूपी खेचरः । इति भरतः ॥ (यथा, रघुः । २ । ६० ।
"तस्मिन् क्षणे पालयितुः प्रजाना-
मुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥")
तस्योत्पत्त्यादिर्यथा,—
"नैकैर्य्यगणैर्व्याप्तं त्रैलोक्यमप्सरोगणैः ।
तेषामुत्पादिताभ्योऽन्यं महागन्धर्व्वनायकाः ॥
उत्पादिताः पुनस्तैर्यै विक्रान्ता युद्धदुर्म्मदाः ।
विद्याधरेश्वरास्ते तु खेचराः कामचारिणः ॥
हिरण्यरोमा कपिलः सुलोमा माधवस्तथा ।
इन्द्रकेतुश्च पिङ्गाङ्गो नादश्चैव महाबलः ॥
गण इत्येवमादिस्तु द्वे चान्ये वै सुलोचने ।
शिवा च सुमनाश्चैव ताभ्यामपि च विश्रवाः ॥
पुनश्चोत्पादयामास विद्या सौमनसं गणम् ।
एतैर्व्याप्तो ह्ययं लोको विद्याधरगणैस्त्रिभिः ॥
एभ्योऽनेकानि जातानि ह्यवरान्तरचारिणाम् ।
लोकेऽस्मिन् गणशस्तानि मन्त्रविद्याविचारिणाम् ।
विद्याधरास्तथान्येऽपि विद्याबलसमन्विताः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥ * ॥
षोड़शरतिबन्धान्तर्गतचरमबन्धः । तस्य लक्षणं यथा, रतिमञ्जर्य्याम् ।
"नार्य्या जरुयुग्मं धृत्वा कराभ्यां ताड़येत् पुनः ।
कामयेन्निर्भरं कामी बन्धो विद्याधरो मतः ॥"

विद्यावान्, [त्] त्रि, (विद्यास्यस्येति । विद्या + मतुप् । मस्य वः ।) विद्याविशिष्टः । विद्याशब्दात् वतुप्रत्ययेन निष्पन्नः ॥ (यथा, प्रबोधचन्द्रोदये । २ । ३१ ।
"विद्यावन्त्यपि कीर्त्तिमन्त्यपि सदाचारावदातान्यपि ।
प्रोच्चैः पौरुषभूषणान्यपि कुलान्युन्मत्तु मीशः क्षणात् ॥")

विद्युज्जिह्वः, पुं, (विद्युदिव चञ्चला जिह्वा यस्य ।) राक्षसविशेषः । यथा,—
"अग्निकेतुश्च दुर्द्धर्षो रश्मिकेतुश्च वीर्य्यवान् ।
विद्युज्जिह्वो द्विजिह्वश्च सूर्य्यशत्रुश्च राक्षसः ॥"
इति रामायणे उत्तरकाण्डे ६० सर्गः ॥
(स्त्री, कुमारानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । ८ ।
"मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलाताक्षी वीर्य्यवती विद्युज्जिह्वा च भारत ! ॥")

विद्युज्ज्वाला, स्त्री, (विद्युत इव ज्वाला यस्याः ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥ (विद्युतो ज्वाला ।) तड़ित्प्रभा च ॥

विद्युत्, स्त्री, (विशेषेण द्योतते इति तच्छीला वा । वि + द्युत + "भ्राजभासेति ।" ३ । २ । १७७ । इति क्विप् ।) सन्ध्या । इति मेदिनी । ते, १५५ ॥ विद्योतते या । तत्पर्य्यायः । शम्पा २ शतह्रदा ३ ह्रादिनी ४ ऐरावती ५ क्षणप्रभा ६ तड़ित् ७ सौदामिनी ८ चञ्चला ९ चपला १० । इत्यमरः ॥ वीपा ११ सौदाम्नी १२ चिलमीलिका १३ सम्पूः १४ अचिरप्रभा १५ सौदामनी १६ अस्थिरा १७ मेघप्रभा १८ अशनिः १९ । इति शब्दरत्नावली ॥ चटुला २० अचिररोचिः २१ राधा २२ नीलाञ्जना २३ । इति जटाधरः ॥ सा चतुर्व्विधा । यथा,—
"अरिष्टनेमिपत्नीनामपत्यानीह षोड़श ।
बहुपुत्त्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ॥"
इति विष्णुपुराणे १ अंशे १५ अध्यायः ॥
चतस्रो विद्युतस्तु ।
"वाताय कपिला विद्युदातपाय हि लोहिता ।
पीता वर्षाय विज्ञेया दुर्भिक्षायासिता भवेत् ॥"
इति ज्योतिःशास्त्रे प्रसिद्धाः । इति तट्टीका ॥

विद्युत्, त्रि, (विगता द्युत् कान्तिर्य्यस्य ।) निष्प्रभः । इति मेदिनी । ते, १५५ ॥ (विशिष्टा द्युत् दीप्तिर्यस्येति विग्रहे । विशेषेण दीप्तिशाली । यथा, ऋग्वेदे । १ । २३ । १२ ।
"हस्काराद्विद्युतस्पर्य्यतो जाता अवन्तु नः ॥"
"हस्कारात् दीप्तिकारात् विद्युतो विशेषेण दीप्यमानात् ।" इति तद्भाष्ये सायणः ॥)

विद्युत्केशः, पुं, (विद्युत इव दीप्तिशालिनः केशा यस्य ।) राक्षसविशेषः । यथा,—
"स कालभगिनीं कान्यां भयां नाम महाभयाम् ।
उदावहदमेयात्मा स्वयमेव महामतिः ॥
स तस्यां जनयामास हेती राक्षसपुङ्गवः ।
पुत्त्रं पुत्त्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम् ॥"
इति रामायणे उत्तरकाण्डे ४ सर्गः ॥

विद्युत्प्रियं, क्ली, (विद्युतः प्रियम् । तदाकर्षकत्वात् ।) कांस्यम् । इति हेमचन्द्रः ॥

विद्युत्वान्, [त्] त्रि, (विद्युतः सन्त्यस्मिन्निति । विद्युत् + मतुप् ।) विद्युद्विशिष्टः । विद्यु-